Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 1
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# प्रणवचिन्तनेन ब्रह्मसाक्षात्कारस्य वर्णनम्

जसवन्त सिंह
शोधार्थी, श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विश्वविद्यालयः।

**Article Info**

**Publication Issue :**
January-February-2024
Volume 7, Issue 1
**Page Number :** 145-147
**Article History**
Received : 01 Feb 2024
Published : 15 Feb 2024

**शोधसारांश :–** आध्यात्मवादस्य पथिकस्य जीवनं श्रेष्ठं भवति। इदमुपनिषत्सु स्पष्टिकृतमस्ति। इत्थमुपनिषत्सु भोगत्यागस्य समन्वयोपस्थयन् अध्यात्मवादेः ब्रह्मणः आनन्दं सर्वोपरिशिष्टं वर्तते। ब्रह्मणः ज्ञानं प्राप्त्वा प्राणिनः स्वजीवनस्य चरमोत्कर्षं लभन्ते। ब्रह्मवेत्तायाः वैशिष्ट्यं परमानन्दमेवास्ति। परमानन्दं ब्रह्मज्ञानेनैव भवति। एतदर्थम् अध्यात्ममार्गेणब्रह्मज्ञानं सम्यक् प्रकारेण कुर्वीत्।

**मुख्यशब्दाः–** ब्रह्मसाक्षात्कारः, उपासना, दर्शनम्, प्रणवचिन्तनम्, ऋषयः, उपनिषद्।

आध्यात्मिकजीवनाय ब्रह्मणः स्मरणं कुर्वीत। ब्रह्मणः किं नामोऽस्ति विषयेऽस्मिन् उपनिषत्सु लिखितं वर्तते यत् ब्रह्मणः उपासनायां प्रणवोऽर्थात् 'ओम्' धनुषः कार्यं करोति।[1]

योगदर्शनेऽपि प्रणवस्योच्चारणं परमात्मनः वाचकरूपेऽभवत्।[2] ईसाईयवनयोः च 'ओम्' इत्यस्य परिवर्तितं रूपं प्रचलति। मुण्डकोपनिषदि ऋषयः कथयन्ति यत् परब्रह्मपरमात्मनः समग्ररूपत्वं ज्ञानाय तेषां चतुष्पादानां कल्पना वर्तते। नामनामी चेकतायाः प्रतिपादनं करणाय प्रणवस्य अ, उ, म् चेतैः त्रीभिः मात्रैः सह मात्रारहितं च तस्याव्यक्तरूपेण सह परब्रह्मपरमात्मनः एकैकस्य पादस्य समता दरीदृश्यते। परब्रह्मपरमात्मन् नामः यत् ओंकार वर्तते, तं समग्रपुरुषोत्तमातुभिन्नं मत्वा कथितमस्ति यत् 'ओम्' इदमक्षरमेव पूर्णब्रह्मविनाशी परमात्मा वर्तते। अस्योपनिषदः प्रारम्भे लिखितं वर्तते यत् 'ओम्' एकमल्पीयांशः शब्दोऽस्ति किन्तु आजगत् अस्यैवेकाक्षरस्य व्याख्या वर्तते। वर्तमानभूतभविष्यश्च इदं सर्वम् ओंकारस्यैव विशद्रूपं वर्तते। एतदर्थं सः भूतवर्तमानभविष्यत् च तस्मात् त्रिभ्यः कालात् परोऽस्ति। तत् ब्रह्मः तु त्रिकालातीत वर्तते।[3]

छान्दोग्योपनिषदः प्रथमप्रपाठके ओंकारोपासनायाः वर्णनमस्ति। अस्य प्रारम्भे लिखितं वर्तते यत् 'ओम्' इदमक्षरम् उद्गीथ वर्तते, अस्योपासनां कुर्वीत्, ओम् इत्यस्योच्चारणम् उच्चस्वरेण कुर्वीत।[4]

ओम् इत्यस्य महत्वस्य वर्णनं कुर्वन् लिखितं वर्तते यत् पंचमहाभूतेषु पृथ्वीमहत्वपूर्णमस्ति। पृथिव्याः जीवनाय जलमत्युपयोगी वर्तते, यस्यापेक्षामौषधीनां महत्वमस्ति, औषधयः रसेन मानवस्य निर्माणं भवति। मनुष्यस्य महत्वं तस्य

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

वाचा वर्तते, वाग् महत्वं वेद ऋचया भवति, ऋचः महत्वं सामगानेनास्ति सामगानस्य च महत्वं ओम् इत्यनेन प्रभोः गानेनास्ति।[5]

उद्गीथस्यार्थं वर्तते – उद् अर्थात् उच्चैः गानम् अर्थात् उच्चस्वरेण प्रभोः गानम् उद्गीथोच्यते। अस्य परमात्मनः अर्थात् प्रणवस्य गानं रसानां रसः परमो रसः वर्तते, अस्य ध्याने परमस्थानमस्ति।[6]

चतुर्थखण्डे इदं स्पष्टितं वर्तते यत् 'ओम्' अक्षरमेवोद्गीथोऽस्ति।[7] ओम् इत्यस्योपासनां कुर्वीत्। एनं गायेयुः।

अतोऽनेन ज्ञायते यत् वयं सामाजिकः अपि स्वकीये सामान्यजीवने प्रणवस्येवोपासनां कुर्मः। प्रणवोपासनया जीवस्य प्रधानलक्ष्यम् अर्थात् मोक्षप्राप्तिः मानवान् भवति। प्रणवविषयेऽनेकाः विचाराः उपनिषत्सु प्राप्यते। प्रधान्येन छान्दोग्योपनिषदि एवं माण्डुक्योपनिषदि प्रणवस्य महीमा दरीदृश्यते। प्रणवस्यैवापरो नामः ओम् वर्तते। यस्योच्चारणं वयं प्रधान्येन स्वजीवने कुर्मः। अतः प्रणवचिन्तनेनोपनिषत्सु ब्रह्मसाक्षात्कारस्यानेकाविद्याः प्राप्यते। ब्रह्मसाक्षात्काराय प्रणवचिन्तनमस्ति महत्वपूर्णमस्ति। अतः प्रणवचिन्तनं मानवं कुर्वीत्।

उपनिषत्सु ब्रह्मवेत्तायाः वैशिष्ट्यम् आध्यात्मिकजीवने मोक्षप्राप्तिः वर्तते। ब्रह्मणः विषये लिखितं वर्तते यः पृथ्वी आपोऽनलवायवाकादिपंचमहाभूतेषु गतिः प्रयच्छति। तस्य ब्रह्मणः ज्ञानं ब्रह्मवेत्तायाः वैशिष्ट्यम् अस्ति। अण्डात् ये उद्भवन्ति ते अण्डजः, स्वेदजः, जरायुजः, उद्भिजः आदयसर्वजगत् तस्यैव करणेन प्रतिष्ठितं वर्तते। सा एव चेतना या सर्वब्रह्माण्डे परमात्मा विद्यते यमुपनिषदि **'प्रज्ञानं ब्रह्म'** उक्तम्।[8]

ऋषयः कथयन्ति यत् मम वाग् मनसि मनः च वाचि प्रतिष्ठति।[9] यथा मम मनसि वर्तते तथैव कथयामि करोति तथैव मनसि वर्तते। आध्यात्मिकतया जीवनैकरुपता आयाति। अहं सत्यमेव वदिष्यामि तन्मामवतु।[10] ब्रह्मणः ज्ञानं प्राप्त्वा प्राणिनं किं प्राप्यतेऽस्मिन् विषये लिखितमस्ति यत् ब्रह्मवेत्ता प्राणी विश्वब्रह्माण्डस्य परमसूक्ष्मरहस्यान् प्राप्यति अर्थात् सर्वं जानाति लभते वा।[11] ब्रह्मणविषये उपनिषत्सु लिखितमस्ति यत् ब्रह्मसत्यं ज्ञानम् अनन्तं च वर्तते।[12]

यः प्राणिहृदयरूपी गुह्यां विद्यमानं ब्रह्मं जानाति सः ब्रह्मवेत्ता सर्वकामाः लभते। ब्रह्मः कोऽपि प्राणि नास्ति किन्तु सः तु शक्तिगुणानां वा भण्डारं वर्तते येन कारणेन सृष्टेः सर्वलौकिकव्यवहाराः प्रचलन्ति। अस्य संसारस्य सर्वं कार्यं सत्यं न्यायदयोपकारज्ञानादिगुणानां हेतोः प्रचलन्ति। परमात्मा सर्वगुणानां भण्डारं वर्तते तेषामेव च गुणैः सृष्टिः प्रचलति। ज्ञानस्य कोऽपि अन्तनास्ति ज्ञानम् अनन्तं वर्तते। परमात्मनः कोऽपि अन्तनास्ति सोऽपि अनन्त वर्तते। ब्रह्मपरमानन्दस्य भण्डारं वर्तते।[13]

अतः ज्ञायते यत् आध्यात्मवादस्य पथिकस्य जीवनं श्रेष्ठं भवति। इदमुपनिषत्सु स्पष्टिकृतमस्ति। इत्थमुपनिषत्सु भोगत्यागस्य समन्वयोपस्थयन् अध्यात्मवादेः ब्रह्मणः आनन्दं सर्वोपरिशिष्टं वर्तते। ब्रह्मणः ज्ञानं प्राप्त्वा प्राणिनः स्वजीवनस्य चरमोत्कर्षं लभन्ते। ब्रह्मवेत्तायाः वैशिष्ट्यं परमानन्दमेवास्ति। परमानन्दं ब्रह्मज्ञानेनैव भवति। एतदर्थम् अध्यात्ममार्गेणब्रह्मज्ञानं सम्यक् प्रकारेण कुर्वीत्।

**सन्दर्भग्रन्थाः**

1.प्रणवो धनुः शरोहि आत्मा। मुण्डक. उप.
2.तस्य वाचकः प्रणवः। योगदर्शन
3.ओमित्येतदक्षरमिदं सर्वं तस्योपख्यानं भूतभविष्यदिति सर्वमोंकार एव।
यच्चान्यत् त्रिकालातीतं तदप्योंकार एव।। माण्डुक. उप. 1
4.ओमित्येतदक्षरम् उद्गीथम्, ओमिति उद्गायति, तस्योपव्याख्यानम्। छान्दो. उप.
5.एषां भूतानां पृथिवी रसः।
पृथिव्याः आपः रसः ओषधीनां पुरुषः रसः। छान्दोग्य. उप. 1/1,
पुरुषस्य वाक् रसः। वाचः ऋक् रसः।
ऋचासाम रसः साम्ना उद्गीथः रसः.....। छान्दोग्य. उप. 1/2
6.स एषः रसानां रसतमः परमः परार्थ्यः...। छान्दोग्य. 1/3
7.ओमिति एतदक्षरमुद्गीथम् उपासीत् ओमिति..... छान्दोग्य 1/4/1
8.एते सर्वे देवाः इमानि च पंचभूतानि...... प्रतिष्ठा प्रज्ञानं ब्रह्म।। एत. उप. 3/3
9.वांगमे मनसि प्रतिष्ठता। मनः मे वाचि प्रतिष्ठितम्।। एत.उप. 3/5
10.सत्यं वदिष्यामि.....तन्माभवतु। एतरेय. उप. 3/5
11.ब्रह्मविदाप्नोति परम्....। तैत्ति. उप. 2/1
12.सत्यं ज्ञानम् अनन्तं ब्रह्म....। तैत्तिरी. उप. 2/1
13.रसो वै सः। रसं हि स्वायं लब्ध्वा आनन्दी भवति...। तैत्तिरीय. उप. 2/7